जनितम्-तः, जनितः, जिजनिषितः, जञ्जनितः-जाजायितः-तवान् ;
जनः, [1]जन्यः, जनः, जिजनिषुः, जञ्जनः-[2]जाजः;
जनितव्यम्, जनयितव्यम्, जिजनिषितव्यम्, जञ्जनितव्यम्, जाजायितव्यम् ;
जननीयम्, जननीयम्, जिजनिषणीयम्, जञ्जननीयम्-जाजायनीयम् ;
[3]जन्यम्, जन्यम्, जिजनिष्यम्, जञ्जन्यम्-जाजाय्यम् ;
ईषज्जनः-दुर्जनः-सुजनः ; — —
जन्यमानः-जायमानः, जन्यमानः, जिजनिष्यमाणः, जञ्जन्यमानः-जाजाय्यमानः ;
जनः, जनः, जिजनिषः, जञ्जनः-जाजायः ;
जनितुम्, जनयितुम्, जिजनिषितुम्, जञ्जनितुम्-जाजायितुम् ;
[4]जातिः, जनना, जिजनिषा, जञ्जना-जाजाया ;
जननम्, जननम्, जिजनिषणम्, जञ्जननम्-जाजायनम् ;
जनित्वा, जनयित्वा, जिजनिषित्वा, जञ्जनित्वा-जाजायित्वा ;
प्रजन्य-प्रजाय, [5]प्रजनय्य, प्रजिजनिष्य, प्रजञ्जन्य-प्रजाजाय्य ;
जनम् २, जनित्वा २, } [6]जनम् २, जनयित्वा २, } जिजनिषम् २, जिजनिषित्वा २, } जञ्जनम् २-जाजायम् २ ; जञ्जनित्वा २-जाजायित्वा २. }

(583) "जनी प्रादुर्भावे" (IV-दिवादिः-1149. अक. सेट्. आत्म.)

प्रादुर्भावः=उत्पत्तिरभिव्यक्तिर्वा। अनुपूर्वकोऽयं धातुः सकर्मकः।

---

1. 'भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्यापात्या वा' (3-4-68) इति कर्तरि भावे च यदन्तो निपातितः।
2. यङन्तात् पचाद्यचि (3-1-134) आत्वपक्षे, अतो लोपे, यकारस्य लुकि, स्थानिवद्भावेन आकारलोपे, रूपम्।
3. 'तकिशसिजनिभ्यो यद्वाच्यः' (वा. 3-1-97) इति यत्। ण्यदपवादः।
4. 'जनसनखनां सञ्झलोः' (6-4-42) इति आत्वे सवर्णदीर्घे रूपम्।
5. 'ल्यपि लघुपूर्वात्' (6-4-56) इति णेरयादेशः।
6. अस्य धातोर्मित्त्वाभावात्, णमुल्परके णिचि उपधायाः वैकल्पिकदीर्घो न।